# Suvasinikrita Shri Hari Stuti

# સુવાસિનીકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Suvasinikrita Shri Hari Stuti

File name : suvAsinIkRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# સુવાસિનીકૃતા શ્રીહરિસ્તુતિઃ

(વસન્તતિલકમ્)
મન્દસ્મિતં મધુરભાષિ મુખારવિન્દં
કર્ણાવલમ્બિચલકુણ્ડલશોભિગણ્ડમ્ ।
કર્ણાન્તદીર્ઘનયનં નયનાભિરામં
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽદ્ધા ॥ ૧॥

શ્રીવત્સલાઞ્છનલસદ્ હૃદયારવિન્દં
લક્ષ્મીનિવાસસદનં નવનીતતુલ્યમ્ ।
વ્યૂઢં વિશાલમધિકં ચ સમુન્નતં હિ
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽદ્ધા ॥ ૨॥

પદ્માદિલક્ષ્મસુવિરાજિતહસ્તપદ્મં
રમ્યં સુશોભિ સુતરાં મૃદુલં સુરક્તમ્ ।
રક્ષોગણાય ભયદં વરદં નિજેભ્યો
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽદ્ધા ॥ ૩॥

રમ્યં સુકોમલતરં વરનાભિપદ્મં
નિમ્નં વલિત્રયગતં ભ્રમવદ્ધિશોભિ ।
પદ્માસનસ્થવસનં જનચિત્તહારિ
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽદ્ધા ॥ ૪॥

વજ્રાઙ્કુશાદિશુભચિહ્નયુતાઙ્ઘ્રિપદ્મં
યોગીન્દ્રમાનસમધુવ્રતસેવ્યમાનમ્ ।
તાપાપહં સપદિ દિવ્યસુખપ્રદાયિ
નિત્યં સ્ફુદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽદ્ધા ॥ ૫॥

વાગ્દોષહચ્ચ સકલાઘહરઃ પવિત્રઃ
કામાગ્નિશામનવિધૌ ચ પયોદતુલ્યઃ ।
મન્ત્રઃ સદૈવ વિબુધૈરપિ રટ્યમાનો

નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽઙ્ઘ્રી ॥ ૬॥

દુગ્ધં પ્રદેહિ વિમલેઽતિબુભુક્ષવે મે
ભુક્તં મયાલમિતિ મેઽસ્તિ ન ભોક્તુમિચ્છા ।
ઇત્થં ત્વયા ત્વભિહિતં સુવચોઽનુવેલં
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽઙ્ઘ્રી ॥ ૭॥

ચેષ્ટા નિજાશ્રયવતાં સુખદાઃ
વ્યામોહદા અપિ ચ દુષ્ટધિયાં પરેશ ।
મૂર્તિસ્તથૈવ નિખિલા પરસૌખ્યધામન્
નિત્યં સ્ફુરેદ્ધિ હૃદિ મે હરિકૃષ્ણ તેઽઙ્ઘ્રી ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
પઞ્ચત્રિંશત્તમે તરઙ્ગે સુવાસિનીકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Suvasinikrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*